# Samantraka Ganapati Stotram

## समंत्रक श्रीगणपतिस्तोत्रम्

नमो गणपतये तुभ्यं ज्येष्ठ ज्येष्ठाय ते नमः।
स्मरणाद्यस्य ते विघ्ना न तिष्ठन्ति कदाचन ।।१ ।।

देवानां चापि देवस्त्वं ज्येष्ठराज इति श्रुतः।
त्यक्त्वा त्वामिह कः कार्यसिद्धिं जंतुर्गमिष्यति ।।२ ।।

स त्वं गणपतिः प्रीतो भव ब्रह्मादिपूजित।
चरणस्मरणात्तेऽपि स्युर्ब्रह्माद्या यशस्विनः ।।३ ।।

परा परब्रह्मदाता सुराणां त्वं सुरो यतः।
सन्मतिं देहि मे ब्रह्मपते ब्रह्मसमीडित ।।४ ।।

उक्तं हस्तिमुखश्रुत्या त्वं ब्रह्म परमित्यापि।
कृतं वाहनमाखुस्ते कारणन्त्वत्र वेद नो ।।५ ।।

इयं महेश ते लीला न पस्पर्श यतो मतिः।
त्वां न हेरंब कुत्रापि परतन्त्रत्वमीश ते ।।६ ।।

# Samantraka Ganapati Stotram

स त्वं कवीनां च कविर्देव आद्यो गणेश्वरः ।
अरविंदाक्ष विद्येश प्रसंनः प्रार्थनां शृणु ।।७ ।।

त्वमेकदन्त विघ्नेश देव शृण्वर्भकोक्तिवत् ।
सत्कवीनां मध्य एव नैकाण्वंश कविं कुरु ।।८ ।।

श्रीविनायक ते दृष्ट्या कोपि नूनं भवेत्कविः ।
तं त्वामुमासुतं नौमि सन्मतिप्रद कामद ।।९ ।।

ममापराधः क्षन्तव्यो नतिभिः संप्रसीद मे ।
न नमस्य विधिं जाने त्वं प्रसीदाद्य केवलं ।।१० ।।

न मे श्रद्धा न मे भक्तिर्न त्वदर्चनपद्धतिः ।
ज्ञाता वदान्य तेऽस्मीति ब्रुवे साधनवर्जितः ।।११ ।।

कर्तुं स्तवं च तेऽनीशः प्रसीद कृपयोद्धर ।
प्रणामं कुर्वेऽतोऽनेन सदानंद प्रसीद मे ।।१२ ।।

इति श्री. प.प. श्रीवासुदेवानंदसरस्वतीविरचितं समंत्रकं श्रीगणपतिस्तोत्रं संपूर्णम् ।।